NS – 109

# III Semester B.Com. Examination, November/December 2016
## (Freshers + Repeaters) (CBCS)
## (2015 – 16 & Onwards)
## LANGUAGE SANSKRIT – III
## Champūrāmāyanam – Aranyakāndam, Grammar and Translation

Time : 3 Hours Max. Marks : 70

***Instructions :*** *1) Answer in* ***Sanskrit/Kannada/English****.*
*2) Answer Q.* ***I, VI*** *and* ***VII*** *in Sanskrit* ***only****.*

I. समीचीनं उत्तरं चिनुत।

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Choose the correct answer. **(10×1=10)**

1) चम्पूरामायणस्य कर्ता कः ?

अ) भासः आ) भोजः इ) बाणः ई) भारविः

2) भोजराजस्य शैली का ?

अ) वैदर्भी आ) पाञ्चाली इ) मागधी ई) गौडी

3) विश्वगुणादर्श चम्पूकाव्यस्य रचयिता कः ?

अ) बाणः आ) भासः इ) भोजः ई) वेङ्कटाध्वरिः

4) शरन्नङ्गः कः ?

अ) गन्धर्वः आ) मुनिः इ) नागः ई) राक्षसः

5) चतुर्दशसहस्रं संख्याकशाखं सैन्यं कः प्रेषयति ?

अ) वातापिः आ) दूषणः इ) खरः ई) रावणः

6) मैथिलीवल्लभः कः ?

अ) लक्ष्मणः आ) रावणः इ) रामः ई) भरतः

7) कुम्भयोनिः कः ?

अ) वरुणः आ) वातापिः इ) रामः ई) अगस्त्यः

8) गृध्रराजः कः ?

अ) वातापिः आ) संपातिः इ) जटायुः ई) इल्वलः

P.T.O.

9) दशग्रीव: इति कस्य नाम ?

अ) मारीचस्य आ) दूषणस्य इ) कबन्धस्य ई) रावणस्य

10) जातरूपमयमृगेण क: आगत: ?

अ) खर: आ) मारीच: इ) सुबाहु: ई) दूषण:

II. **द्वयो:** प्रश्नयो: प्रबन्धं लिखत।

**ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ. **(2×10=20)**

Write an essay on **any two** questions.

1) प्रमुखपञ्चचम्पूकाव्यानि

ಪ್ರಮುಖ ಪಂಚ ಚಂಪೂ ಕಾವ್ಯಗಳು

Five major Champukavyas.

2) भोजराजस्य जीवन काल कृतय:।

ಭೋಜರಾಜನ ಜೀವನ, ಕಾಲ ಮತ್ತು ಕೃತಿಗಳು.

Life, data and works of Bhoja Raja.

3) अगस्त्य महर्षि:।

ಅಗಸ್ತ್ಯಮಹರ್ಷಿ.

The Great Sage Agastya.

III. a) **द्वयो:** श्लोकयो: अनुवादं कृत्वा विवृणुत।

**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any two** shlokas. **(2×4=8)**

1) या तु न: पदवी सैषा यातुनश्चास्य लक्ष्मण।
यातुकामं तयैवेदं यातु कामं न हन्यताम्।।

2) तस्मिन्महापथधिया वदनं विगाह्य
निर्गन्तुमक्षमतया जठरे लुठद्भि:।
वन्यैर्गजैरजगरा: पिशिताशनेभ्यो
वातापिदानवदशामुपदेशयन्ति।।

3) प्राग्मन्थरेति महिषीति वरद्वयीति
धर्मव्ययव्यथितभूपति भारतीति।
काकुत्स्थकाननकथेति च सन्ति संज्ञा:
पौलस्त्यहान भुवनत्रयभाग्य पङ्क्ते: ।।

4) दशरथात्मजयुग्मनिरीक्षणक्षणसमाकुलबुद्धिरियं दधौ।
उभयकूल समस्थितशाद्वलभ्रमगतागतखिन्नगवीदशाम् ।।

b) गद्यभागम् अनुवदत।
ಗದ್ಯ ಭಾಗವನ್ನು ಅನುವಾದಿಸಿ.
Translate the passage. **(1×4=4)**

तत: परमहर्षेण महर्षिणा प्रणीताभिराशीभि: सह मुरशासनशरासनं सरसिजासनास्त्रं सौत्रामणं तूणीरयुग्मं रुक्ममयकोशं खड्गं च प्रतिगृह्यं तदाज्ञया गोदावरी तटनिकटप्रकटितां पञ्चवटीमसेवत।

**अथवा**

ततस्तीक्ष्णतपस: सुतीक्ष्णस्य निदेशेन देशात्तस्मादुच्चलित: सलिलनिधिपान सम्भावितजीवनाभावशङ्कया शरणाश्रयणाय लम्बमाननीलाम्बुदकुटुम्बसन्देहावहेन नानानोकहनिवहेन पिहिताभोगमगस्त्याश्रमं ''राम: ससंभ्रममाससाद''।

IV. **द्वयो:** वाक्ययो: ससंदर्भं विवृणुत। **(2×4=8)**

**ಎರಡು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.
Explain with reference to context **any two** sentences.

1) विपिन महिषवेषै: केवलं ते वलन्ते।
2) देवालयादिव निरस्तजनादलर्क:।
3) कौ युवां युवानौ ?
4) मैथिलीपक्षपातेन पक्षपातमबाप्य स:।

V. **द्वयो:** लघु टिप्पणी लिखत।

**ಎರಡಕ್ಕೆ** ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.
Write short notes on **two**. **(2×2½=5)**

1) चम्पू लक्षणं
2) रावण:
3) जटायु:
4) सीता।

VI. a) **संस्कृत** भाषया उत्तराणि लिखत।

दोषान् परिहरत (**पञ्चानां** एव) : **(5×1=5)**

1) शिवं नमः।

2) वृक्षेण फलं पतति।

3) अलं विस्तारः।

4) वेदाः प्रमाणाः।

5) भवती कुत्र गच्छसि ?

6) रामः स्वस्ति।

7) चोरेण भीतः।

8) एषः बालिका।

b) **संस्कृते** वाक्यं रचयत (**पञ्चानां** एव) : **(5×1=5)**

अ) वदति

आ) उक्त्वा

इ) कावेरी

ई) जलम्

उ) त्वं

ऊ) यद्यपि

ऋ) विवादः

ए) स्वस्ति

VII. **संस्कृत** भाषायां अनुवदत। **5**

ಭಾರತದಲ್ಲಿ ಬೇರೆ ಬೇರೆ ದೇವರುಗಳನ್ನು ಪೂಜಿಸುವವರಿದ್ದಾರೆ. ನೂರಾರು ಹೆಸರುಗಳಿದ್ದರೂ ದೇವರು ಒಬ್ಬನೇ ಇರುವನು. ಆದ್ದರಿಂದ ಭಕ್ತರಲ್ಲಿ ದೇವರ ಹೆಸರಿನಲ್ಲಿ ದ್ವೇಷ ಕೂಡದು. ಅನ್ಯದೇವ ಭಕ್ತನನ್ನು ದ್ವೇಷಿಸುವುದು ಅಧರ್ಮ. ಆಕಾಶದಿಂದ ಬಿದ್ದ ನೀರು ಸಮುದ್ರವನ್ನೇ ಸೇರುತ್ತದೆ. ಹಾಗೆಯೇ ಎಲ್ಲಾ ದೇವರ ಪೂಜೆಯೂ ಪರಮಾತ್ಮನನ್ನೇ ಸೇರುತ್ತದೆ.

In India there are people worshipping different Gods. Though there are hundreds of names there is only one God. Therefore there should not be hatred among the devotees of other Gods. Hatring the devotee of another God is not righteous. The water falling from the sky joins the Ocean. The worship of all Gods reaches the Supreme Lord.

---